National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 48-50
© 2025 NJHSR
www.sanskritarticle.com

**डा.एल्. सुधीन्द्राचार्यः**
न्यायवेदान्तविभागप्राध्यापक,:
पूर्णप्रज्ञविद्यापीठम्, कत्तरिगुप्पा,
बेङ्गलूरु, कर्णाटकम् -560028

**Correspondence:**
**डा.एल्. सुधीन्द्राचार्यः**
न्यायवेदान्तविभागप्राध्यापकः,
पूर्णप्रज्ञविद्यापीठम्, कत्तरिगुप्पा,
बेङ्गलूरु, कर्णाटकम् - 560028

# चन्द्रिकायां भोक्त्रधिकरणम्

**डा.एल्. सुधीन्द्राचार्यः**

श्रुत्यर्थनिर्णायकन्यायग्रथनात्मकं हि ब्रह्ममीमांसाशास्त्रम्। सर्वाणि सूत्राणि युक्तिरूपाणि भवन्तीति निश्चप्रचम्। अनुमानमुद्रया इमानि विज्ञातुं शक्यन्ते। यथा “[1]आनन्दमयः (आनन्दमयशब्दवाच्यः) विष्णुः, अभ्यासात् (ब्रह्मशब्दाभ्यासात्)” इति। इमानि सूत्राणि नारायणावतारभूतेन भगवता व्यासेन सर्वज्ञमुनिना प्रणीतानीत्यत्र न विवदन्ते केऽपि विदः। श्रीमदानन्दतीर्थभगवत्पादाचार्यैः सूत्रवाङ्मयमधिकृत्य चत्वारः प्रबन्धाः प्रणीताः। तत्रान्यतमं ब्रह्मसूत्रभाष्यम्। श्रुतिस्मृतिवचनोल्लेखनपुरःसरं सूत्रार्थवर्णनमिह कृतमिति ग्रन्थस्यास्य वैशिष्ट्यम्, नात्र परमतप्रक्रियानिरसनस्य विस्तरः। एकेन द्वाभ्यां वा वचनाभ्यां परमतनिरसनमिह विधीयते। अनुभाष्यं द्वितीयं भगवत्प्रणीतम्। एतदेवानुव्याख्यानमित्यपि गीयते। भाष्यमनुसृत्य प्रवृत्तः भगवत्पादीयग्रन्थान्तरगतयुक्तिसमुद्धरणात्मकः परकीयव्याख्याननिरसनचतुंश्चायं प्रबन्धः माध्ववेदान्तेऽसाधारणं महत्त्वं भजते । ब्रह्मसूत्रानुव्याख्याने तु सर्वेषां मताचार्याणां प्रायः प्रतिसूत्रं विमर्शः कृतः। भगवत्पादाचार्यौपसदः त्रिविक्रमपण्डिताचार्या भाष्यस्य निरतिशयमाहात्म्यमेवम् उपवर्णयन् सहस्रार्थस्य भाष्यस्य “तत्वप्रदीपः” इति। आचार्यपादचरितनिबन्धारः नारायणपण्डिताचार्याः भाष्यस्यास्य महिमानमेवं प्रतिपादयामासुः –

[2]बालसङ्घमपि बोधयद्भृशं दुर्निरूपवचनं च पण्डितैः।
अप्रमेयहृदयं प्रसादवत् सौम्यकान्ति च विपक्षभीषणम् ॥ (सुमध्वविजये ९ सर्गे १०श्लोकः)
[3]अस्तदूषणमवन्द्यभाषणं लक्षितं सकललक्षणैः समम्।
माननीयमपि नाकिनायकैः रूपमन्यदिव धन्यमात्मनः॥ इति (सुमध्वविजये ९ सर्गे ११श्लोकः)
सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुकारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥ इति च

भाष्यलक्षणमत्रान्वर्थकमनुभूयते। भाष्यस्यास्य हार्दमाविष्कुर्वन्ती श्रीमज्जयतीर्थपूज्यचरणप्रणीता प्रत्यधिकरणं पूर्वपक्ष-सिद्धान्तप्रज्ञापनचतुरा तत्त्वत्प्रकाशिका विराजतेतमाम् । अस्याः प्रकाशिकायाः समुद्र इव परमगभीरया आशयविशेषं प्रकाशयन्ती श्रीमद्व्यासतीर्थपूज्यचरणविरचिता चन्द्रिकाऽपि स्वमतानुगुण्येन सूत्रार्थसमर्थनदक्षा परकीयसूत्रार्थासमाञ्जस्यप्रदर्शनदीक्षा च विद्वज्जनैकसुलभा च विराजते। ब्रह्मसूत्रभाष्यस्य महत्त्वम् अपूर्वत्वं च न्यायसुधाचन्द्रिकादिग्रन्थेषु तत्र तत्र सुष्ठुपवर्णितमस्ति । माध्वग्रन्थाध्ययनजिज्ञासूनां विदुषाम् अत्रत्यविचारप्रणालीं दिङ्मात्रमेव प्रदर्शयितुं इच्छामि। नैकानि सूत्राणि सन्ति परन्तु अहमिदानीम् भोक्त्रधिकरणं (भोक्त्रापत्तेरविभागः[4]) इति कञ्चन सूत्रमधिकृत्य चन्द्रिकोक्तदिशा यथामति विवृणोमि।

**भोक्त्रापत्यधिकरणम्**

[5]ॐअथातो ब्रह्मजिज्ञासाॐ इति प्रथमसूत्रम्। तत्र ब्रह्मणः जिज्ञासायाः कर्तव्यत्वं निरूपितम् ।

[6]ॐजन्माद्यस्य यतःॐ इति द्वितीयं सूत्रम्। तत्र तावत्ब्रह्मणः सर्वकर्तृत्वमुक्तम्। परन्तु ब्रह्मणः सर्वकर्तृत्वे "परेऽव्यये सर्व एकीभवन्ति" इति अभेदश्रुतिः विरोधिनी भवति। श्रुतिः नाभेदपरा इति स्थापनेन श्रुतिसिद्धान्तविरोधोऽत्र प्रतिपाद्यते। इह ब्रह्मणो मुक्ताभेदमात्रे न पूर्वपक्षपर्यवसानम्, अपि तु अभेदयुक्त्या सर्वकर्तृत्वं नाङ्गीका-राईमिति चिन्ताऽत्र क्रियते। मुक्तेश्वरयोः भेदसमर्थनेनेदम-धिकरणं फलाध्यायसङ्गतमिति शङ्का तु फलत्वेऽपि युक्तिविरोधे-ऽन्तर्भा-वादत्रोक्तेति परिहरणीया। अयमत्राधिकरणसारः-विष्णोर्ज-गत्कारणत्वे युक्तिविरोधः परिह्रियते। [7]"परेऽव्यये सर्व एकीभवन्ति" इति श्रुतिः मुक्तौ सर्वेषां जीवानां ब्रह्मणा सह अभेदमभिदधाति। यतः तयोर्मुक्तावभेदस्तत एव पूर्वमपि अभेदो विद्यत इत्यनुसन्धेयम् । तत्र युक्तिः (न हि संसारे अन्यस्य = ब्रह्मणः अन्यस्य = जीवस्य मुक्तौ अन्यत्वं ब्रह्मत्वं युज्यते)। एवं पूर्वपक्षिते भगवानाह सूत्रकार "भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्" इति। सूत्रार्थः भोक्तुः = जीवस्य मोक्षे, आपत्तेः = ब्रह्मत्वापत्तेः, [7]परेऽव्यये सर्व एकीभवन्ति इत्यादिषु श्रवणात्, तयोः = जीवब्रह्मणोः, अविभागः = भेदाभावः इति चेत्, न । यतः स्याल्लोकवत्, जले जलान्तरस्य एकीभावोक्तिवत् भेदेऽपि स्थानैक्याद्यालम्बनेन ऐक्योक्तिरुपचरिता स्यात्। अयमभिप्रायः - यथा लोके उदके उदकान्तरसेचने मिश्रं भवति उदकं तद्वत्। नात्रोभयोरभेदः सम्भावयितुमपि (दृश्यते) शक्यते, वृद्धेर्दर्शनात्। एवञ्च जीवोऽपि मुक्तौ परमात्मना सम्मिलितो भवति नाभिन्नः। तादृगेव भवति इति श्रुतिः तत्सादृश्यमेव प्रतिपादयति नाभेदमिति निश्चप्रचम्।

अत्र भाष्ये तावत् भगवत्पादाचार्यैः "न ह्यन्यस्य ह्यन्यत्वं युज्यते" इति युक्तिः पूर्वपक्षस्थापकतया उदाहृता। परम् अनुव्याख्याने तु "नान्यदन्यत्वमापन्नं कचित् दृष्टं कथञ्चन" इति इह भिन्नमुत्तरत्र नाभेदमापन्नं दृश्यते इत्यभेदनिरासपरतया सिद्धान्तस्थापकतया व्याख्याता । एकैव युक्तिः पूर्वपक्षस्थापिका सिद्धान्तस्थापिका च कथं सम्भवति[8] इति तु महान् प्रश्नः समुन्मिषति। तादृशविरोधं चन्द्रिकाचार्याः तात्पर्यचन्द्रिकायां परिहृतवन्तः तात्पर्यचन्द्रिकायां तु एवं विरोधपरिहारक्रमः दरीदृश्यते। अत्र त्रयः पूर्वपक्षाः सम्भवन्ति। एकीभवन्ति इति श्रुत्या ब्रह्मणस्तावन्मुक्तावभेदः प्रतीयते। न च तावतैव ब्रह्मणः सर्वकर्तृत्वं प्रतिषिद्धं भवति। संसारिण इव मुक्तस्य सर्वकर्तृत्वं प्रतिषिद्धं भवति । संसारिणः सर्वकर्तृत्वे विरोध इव मुक्तस्य सर्वकर्तृत्वे प्रत्यक्षादिविरोधाभावात् पूर्वमसतो मोक्षस्य ज्ञानेनोदय इव पूर्वमसतोऽपि सर्वकर्तृत्वस्य मुक्तौ सम्भवात्। ततश्च जीवाभिन्नस्य ब्रह्मणः सर्वकर्तृत्वं न भवतीति वक्तुं शक्यते ।

असर्वकर्तृत्वेन योऽयं संसारी प्रसिद्धः तदभिन्नत्वात् ब्रह्मणोऽपि न सर्वकर्तृत्वमुपपद्यते। न च श्रुतिः मुक्तजीवस्यैव ब्रह्मभावमभिदधातीति वाच्यम्। "[9]न ह्यन्यस्यान्यत्वं युज्यते" इति न्यायेन अन्यस्य = संसारे भिन्नस्य मुक्तौ अन्यत्वं ब्रह्मभावः न युज्यते। न हि क्वापि घटः कालान्तरे पटो भवति। अतः मुक्तौ जीवः परमात्माभिन्नः तर्हि संसारेऽपि तथा। तथा च संसारिण असर्वकर्तृत्वं प्रत्यक्षसिद्धम्। तदभिन्नस्य ब्रह्मणोऽपि तथेति न विष्णोः सर्वकर्तृत्वं युक्तमिति।

अस्मिन् पक्षे "एकीभवन्ति" इत्यत्र अभूततद्भावार्थकच्विप्रत्ययः कथं सङ्गच्छते । प्रतीत्यपेक्षया तदुपपत्तेः। प्राग्विभिन्नतया दृष्टोऽयं जीवः मुक्तौ अभिन्नतया दृश्यत इति एकीभवन्ति इत्युच्यते । एवञ्च मुक्तावभेदेन पूर्वमप्यभेदं प्रसाधयितुं न ह्यन्यस्य अन्यत्वं युज्यते (मुक्तावभेदेन पूर्वमपि अभेदं प्रसाधयितुम्) इति पूर्वपक्षभाष्यम् प्रवृत्तम्।

२)[10]च्विप्रत्ययस्वारस्यात् पूर्वं भेदः मुक्ती त्वभेदः इति द्वितीयः पक्षः। "न ह्यन्यस्य" इति युक्तिस्तु च्विप्रत्ययश्रुतिबाधिता। एवञ्च जीवब्रह्मणोरभेदात् न ब्रह्मणः वास्तवं जगत्कारणत्वं युक्तम् इति द्वितीयः पक्षः।

एतत्पक्षनिरासाय पूर्वं भेदस्य सिद्धत्वेन मुक्तावपि स एवाङ्गीकार्य इति साधयितुं "नान्यदन्यत्वमापन्नं क्वचिद् दृष्टं कथञ्चन" इति अनुव्याख्यानं प्रवृत्तम्। यतो लोके अन्यत् वस्तु अन्यत्वं वस्त्वन्तरणाभेदमापन्नं क्वचित् न दृष्टम्। अतः तद्दृष्टान्तेन जीवस्य मुक्तावपि न ब्रह्मभावो भवतीति।

३) तृतीयस्तु - पूर्वं भेदाभेदौ मुक्तौ तु केवलाभेदः। एवञ्च च्विप्रत्ययो युक्तः। इदानीं च्विप्रत्ययस्य अर्थसङ्कोचो नास्त्येव। पूर्वं केवलाभेदाभावात्। "न ह्यन्यस्य" इति युक्तिविरोधोऽपि न। पूर्वमप्यभेदस्य सत्त्वात्। एतं वा पक्षमाश्रित्य भाष्यानुव्याख्याने प्रवृत्ते। तत्र भाष्ये च्विप्रत्ययेन पूर्वं भेदस्य सिद्धत्वात् पूर्वपक्षानुपयुक्तत्वाच्च अभेद एव साधितः। अनुव्याख्यानेऽपि पूर्वं भिन्नाभिन्नस्यापि पश्चात् केवलाभेदो नास्तीति भावेन "नान्यदन्यत्वम्" इत्युक्तम्। उक्तं पक्षत्रयमपि मुक्तावभेदसापेक्षम्। स एवासिद्धः, एकीभवन्ति इति श्रुतेः भाष्ये यथोदकं तूदके सिक्तम् इति

श्रुत्यन्तरादिविरोधोक्तेः ।

न्यायविवरणे "निरञ्जनः[11] परमं साम्यम्" इति पूर्ववाक्यविरोधस्य परात्परं पुरुषमुपैति इति उत्तरवाक्यस्य च विरोधोक्तेः । परमसाम्यम् अभेदविरोधीति स्फुटम्। एवं पुरुषमुपैति इति परमपुरुषमिलनमपि अभेदविरोध्येव।

अभेदपरत्वे "परेण" "अव्ययेन" इति तृतीया स्यात् न तु सप्तमी । सायं गोष्ठे गाव एकीभवन्ति इत्यादाविव एकस्थानस्थितत्वनिमित्तेन ऐक्यव्यपदेशोपपत्तेः। "कर्माणि विज्ञानमयश्च आत्मा" इत्यत्र कर्मणां ब्रह्मैक्यस्य बाधितत्वात् अभेदप्रतिपादनम् अयुक्तम्।

रथ्याजलं गङ्गाजलेनैक्यमापन्नम्, "गोष्ठे गाव एकीभूताः", स्थलद्वयेऽपि स्थानैक्यपरा, एकीभूता सेना इत्यत्र मत्यैक्यपरा। एवं एकीभवन्ति इत्यत्रापि ऐक्यवाक् भेदाविरोधिनी। तदुक्तम्-

रथ्याजलं विष्णुपदीजलेनैकत्वमागतम् ।
इतस्ततो गता गावः सायमेकत्वमागताः[12]॥
एकीभूता तु सा सेना पाण्डवानभ्यवर्तत ।
इत्यादिवत् भवेदेकीभवन्तीत्यादिवेदवाक्[13] इति

न च जलस्य जलान्तरमेलनेनैक्यं क्वापि दृष्टम् । उक्तञ्च न्यायामृते – "माशराशौ प्रक्षिप्तमाषतदवयवानामिव क्षीरे प्रक्षिप्तनीरतदवयवानामिव चान्योन्यं मिश्रभावोऽपि प्राग्भिन्नानां पश्चादप्यैक्यायोगात्" इति। अपि च "ता एवापो ददौ तस्य स मुनिः संश्रितव्रत (कौर्मे) इत्यस्ति ऐतिह्यम्। अत्र एवं कथा श्रूयते - इन्द्रः सजले वसिष्ठकमण्डलौ स्वकमण्डलुजलम् उत्तरत्र परीक्षार्थं स्थापयित्वा सुदासस्य राज्ञो यज्ञं प्रति गत्वा पुनरागत्य वसिष्ठं प्रति परीक्षार्थं स्वजलं ययाचे । वसिष्ठः तज्ज्ञात्वा ता एवाप इन्द्राय ददौ । अनेनापि उदकस्योदकान्तरमेलनेन ऐक्यं न दृश्यते इति ज्ञायते। न्यायामृते उदाहरणान्तरमपि प्रदर्शितम्। "कृष्णवेणी तुङ्गभद्रा भीमरथी मलापहा भवनाशिनी" इति सप्तनदीनां निवृत्तिसङ्गमे मिश्रीभूय उत्तरत्र गतानां पुनः विभज्य प्रत्येकं प्रत्येकं समुद्रगमनदर्शनात् इति। न्यायामृततरङ्गिण्याम् - गङ्गायमुनयोः प्रयागे सङ्गत्य प्राचीं गतयोः पुनर्विभक्तयोरियं गङ्गा इयं यमुनेति गौडदेशे जनैर्व्यवह्रियमाणयोः सर्वसिद्धत्वात्। समुद्रेऽपि नदीसङ्गमस्थले अल्पा वृद्धिः दृश्यते इति समुद्रतीरवासिनां प्रवादः अस्ति इति उक्तमस्ति।

अपि च उदकस्य उदकान्तरैक्ये "यथोदके शुद्धे शुद्धमासिक्तं तादृगेव भवति" इति भाष्योक्त सावधारणश्रुतिविरोधः स्यात् । यतो वृद्धिः प्रदृश्यते इति सयुक्तिकस्मृतिविरोधोऽपि स्यात् । अतः नाभेदः वक्तुं शक्यते । उक्तञ्च न्यायामृते -

यथा पक्षी च सूत्रं च नानावृक्षरसा यथा ।
यथा नद्यः समुद्रश्च शुद्धोदलवणे यथा ॥
यथा स्तेनापहार्यौ च यथा पुंविषयावपि ।
तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ॥
मानभेदात् स्पर्शरसपूर्वभेदाच्च नीरयोः।
मेलनेऽप्यभिदा नास्ति यथैव क्षीरनीरयोः॥ इति।

(न्यायामृते तृतीयसम्पुटे)

प्रत्यक्षानुभवाच्च भेद एव सिद्धः । अन्यथा इत्युक्तेः।

हंसेन विविच्यमानयोः क्षीरनीरयोरभेदः स्यात्। अपि च द्रुतसुवर्णताम्रयोर्मेलनेनाभेदे तत्कार्यं पणादौ केवलस्वर्णादिकार्यपणान् मूल्यादिभेदा न स्यात्। अपि च नदीपाथःपरमाणूनां समुद्रपाथः परमाणुभ्यः पूर्वावस्थितेभ्यो भेद एव नाभेद इति भामत्युक्तनदीसमुद्राभेदः निरस्तः।

तदुक्तं व्यासतीर्थैः-

माषादिवच्च राश्यादौ सभादौ ब्राह्मणादिवत् ।
जले जलान्तरस्यापि संश्लेषो न त्वभिन्नता ॥ इति। (न्यायामृते)

अत एव भाष्ये तादृगेव भवति इत्युक्तम् । यदि अभेदाभिप्रायः तर्हि तदेव इति स्यात् । तस्मात् नदीसमुद्रादिदृष्टान्तानुगुण्येन जीवेशयोर्भेद एव, न तु कदापि अभेदः।

तदेवं जीवेश्वरयोरभेदविषये चन्द्रिकायां न्यायामृते च भाष्ये च यदुक्तम् तत् मया यथामति निरूपितम्। भ्रान्तेश्चेतनधर्मत्वात् दोषा भवेयुः। हंसक्षीरन्यायेन सज्जनाः विद्वज्जनाः दोषान् विहाय गुणान् गृह्णन्तु इति प्रार्थये॥

**<u>सन्दर्भसूचि</u>**


[1]सूत्रम् १-१-१२
[2]नवमसर्गे(९) दशमश्लोकम्
[3]नवमसर्गे(९) एकादशश्लोकम्
[4]ब्र.सूत्रम् २-१-१३
[5]ब्र.सूत्रम् १-१-१
[6]ब्र.सूत्रम् १-१-२
[7]मुण्डक ३७ (३-२-७)
[8]व्यासतीर्थकृतग्रन्थः (माध्वो ग्रन्थः)
[9]ब्र.सू. भाष्यम् मध्वाचार्यकृत
[10]पा.सू ५-४-५०
[11]मुण्डक ३-१-३
[12]तृतीयपरिच्छेदे
[13]तृतीयपरिच्छेदे